# संस्कृत-वार्ता:

**दिनाङ्क:- 19.04.2024**

**प्रात:- 06:55**

**अथ वार्ता:**

**प्रथम चरणीय- सामान्यनिर्वाचनम्**

अद्य लोकसभानिर्वाचनस्य प्रथम-चरणीय मतदानं भविष्यति। अस्मिन् चरणे द्वयाधिकैकशतं यावत् समस्त-संसदीयक्षेत्राणां कृते मतदानं भविष्यति, येषु अनुसूचितजातीयानां-कृते अष्टादश, अनुसूचित-जनजातीयानां कृते च सप्तदश लोकसभा-सनानि अरक्षितानि सन्ति। एतानि राज्यानि उत्तर प्रदेश-पश्चिम-बग्डाल- बिहार-असम-मध्यप्रदेश-महाराष्ट्र-राजस्थान-तमिलनाडु-उत्तराखण्ड-अरूणाचलप्रदेश-मणिपुर-मेघालया: च सन्ति। निर्वाचन-रणस्य प्रमुख-प्रत्याशिसु भाजपेति दलस्य वरिष्ठनेता नितिन गडकरी-सर्वानन्दसोनोवाल:- किरेनरिजिजू- डॉ. जितेन्द्रसिंह: संजीवबाल्यानेन सहैवं तमिलसाई सुन्दरराजन:-जतिनप्रसाद: च सन्ति। कांग्रेस नेतृषु- गौरवगोगोई-कार्तिचिदम्बरम: नकुलनाथ: तत्रैव डीएमके-दलस्य दयानिधि-मारन: च प्रमुख-प्रत्याशिसु सन्ति, येषां राजनैतिकभाग्यं अद्य ईवीएम इत्याख्य-तंत्रस्य आभ्यन्तरे मुद्रितं भविष्यति। अस्मिन् प्रथम-चरणीय-मतदाने पञ्चविंशत्यधिक-षड्शताधिकैकसहस्रं यावत् अभ्यर्थीन: निर्वाचनरणे सन्ति। मतदानम् अद्य प्रात: सप्तवादने आरप्स्यते। अस्मिन् चरणे त्रिषष्ठी-लक्षाधिक-षोडशकोटि-यावत् मतदातृणां कृते त्रिषष्ठीसहस्राधिकैकलक्षं-यावत् मतदान- केन्द्राणां निर्माणम् अभवत्। अस्मिन् निर्वाचने प्राय: षड्त्रिंशत-लक्षं यावत् मतदातार: स्वीय मताधिकारस्य प्रथमवारं प्रयोगं करिष्यन्ति। महाराष्ट्रे अद्य पञ्चासनेषु मतदानं भविष्यति।

**डीआरडीओ-आईटीसीएम**

रक्षानुसंधानविकाससंघटनेन **डीआरडीओ** इत्यनेन ह्यः स्वदेशीयप्रौद्योगिक्या विनिर्मितस्य क्रूजमिसाइल इत्यस्य सफल- उड्डयन-परीक्षणं कृतम्। ओडिशा-तटस्य समीपे चण्डीपुर-नगरस्य एकीकृत-परीक्षण-केन्द्रात् अस्य क्षेपणास्त्रस्य परीक्षणं जातम् । रक्षामन्त्रालयस्य अनुसारं भारतीयवायुसेनायाः सु-३०-एमके-आइ विमानेन अपि अस्य क्षेपणास्त्रस्य निरीक्षणं कृतम्। रक्षामन्त्रिणा राजनाथसिंहेन क्षेपणास्त्रस्य सफलविमानपरीक्षणाय डीआरडीओ इत्यस्यअभिनन्दनं कृतम्।

**ऋतुविभाग:-उष्णलहरी**

भारतीय-ऋतु-विज्ञान-विभागेन आगामि त्रिषु दिवसेषु ओडिशायां तमिलनाडुराज्ये-तटीयान्ध्रप्रदेशे पश्चिम-बंगाले च प्रगाढ़-उष्णलहर्या: प्रभावो भविष्यतीति प्रख्यापितम्। एतेषु क्षेत्रेषु तापमानं चत्वारिंशत् डिग्री-सेल्सियस-मितादपि अधिकस्य संभावना वर्तते। ऋतु-विज्ञान-विभागेन झारखण्ड-उत्तरी-कोंकण-सौराष्ट्र-मध्य-महाराष्ट्र-तेलंगाना-तमिलनाडु-पुदुचेरी-चेत्यादिषु स्थलेष्वपि उष्णलहर्या: प्रभाव: संभावित:। आकाशवाण्या: वार्ताहरै: सह संवादे ऋतु-विज्ञान-विभागस्य वरिष्ठ-वैज्ञानिक: आर.के.जैनामणि: जनान् एतस्मिन् संदर्भे अवधानतायै संप्रार्थितवान्। तेनोदीरितं यत् उत्तरभारते उष्णलहर्या: अधिको प्रभाव: न भविष्यति। दिल्ली-राजस्थान-पंजाब-हरियाणादिषु सामान्यवृष्टे: संभावना वर्तते। हिमाचलप्रदेशे अतिवृष्टि: संभाव्यते।

**आई.पी.एल्.-क्रिकट्**

आई.पी.एल. क्रिकेटक्रीडामालिकायां मुम्बई-इण्डियन-दलेन पंजाब-किंग्स-दलम् ह्य: चण्डीगढ़-नगरे नव-स्तोभै: पराजितम्।

अद्यतने द्वन्द्वे, लखनऊ-एकाना- क्रिकेट- क्रीडांग्णे लखनऊ-सुपर-जॉइंट्स-दलं चेन्नई-सुपर-किंग्स-दलेन स्पर्धिष्यते। इयं स्पर्धा सायं सार्ध-सप्तवादने आरप्स्यते।

**॥ इति वार्ता: ॥**